परिमुह रुचि नृति वद वस इत्येतेभ्यो ण्यन्तेभ्यः परस्मैपदं न [1]भवति। [2]'णिचश्च' (१.३.७४/२५६४) इत्यात्मनेपदं[3] भवति। [4]तत्र पिबतिर्निगरणार्थः। दमिप्रभृतयश्चित्तवत्कर्तृकाः। नृतिश्चलनार्थोऽपि। [5]एषां परस्मैपदं न भवति। पा--पाययते। दमि–दमयते। आङ्यम–आयामयते। 'यमोऽपरिवेषणे' (ग.सू. १९३) इति मित्सञ्ज्ञा प्रतिषिध्यते। आङ्यस–आयासयते। [6]परिमुह–परिमोहयते। रुचि–रोचयते। नृति–नर्तयते। वद–वादयते। वस–वासयते।

[५४] पादिषु धेट उपसङ्ख्यानम्[7]। (म.भा. १.२९५)

धापयेते शिशुमेकं समीची (ऋ. १.१९६.५)॥

## वा क्यषः। (९०/२६६९)

'लोहितादिडाज्भ्यः क्यष्' (३.१.१३/२६६८) इति वक्ष्यति। [8]तदन्ताद् धातो[9]र्वा परस्मैपदं [10]भवति। लोहितायति, लोहितायते। पटपटायति, पटपटायते। [11]अथात्र परस्मैपदेन मुक्ते कथमा[12]त्मनेपदं लभ्यते, यावता 'अनुदात्तङित आत्मनेपदम्' (१.३.१२/२१५७) [13]इत्येवमादिना प्रकरणेन तन् नियतम्? एवं तर्हि आत्मनेपदमेवात्र विकल्पितं [14]विधीयते, [15]तच्चानन्तरं परस्मैपदप्रतिषेधेन सन्निधापितमिह[16] सम्बध्यते। तेन मुक्ते, शेषात् कर्तरि परस्मैपदम् (१.३.७८/२१५९) भवति॥

## द्युद्भ्यो लुङि। (९१/२३४५)

वा [17]इत्येव। 'द्युत दीप्तौ' (धा.पा. ७४१)। तत्साहचर्याद् [18]लुठादयोऽपि 'कृपू' (धा.पा. ७६२) पर्यन्तास्तथैव व्यपदिश्यन्ते। बहुवचननिर्देशादाद्यर्थो [19]भवति। अनुदात्तत्वान् नित्यमेवात्मनेपदे प्राप्ते [20]द्युतादिभ्यो लुङि [21]वा परस्मैपदं भवति। व्यद्युतत्, व्यद्योतिष्ट। [22]अलुठत्, अलोठिष्ट। लुङि इति किम्? [23]द्योतते॥

## वृद्भ्यः स्यसनोः। (९२/२३४७)

[24]द्युतादिष्वेव वृतादयः पठ्यन्ते। 'वृतु वर्तने' (धा.पा. ७५८), 'वृधु वृद्धौ' (धा.पा. ७५९) 'शृधु शब्दकुत्सायाम्' (धा.पा. ७६०), 'स्यन्दू प्रस्रवणे' (धा.पा. ७६१), 'कृपू सामर्थ्ये' (धा.पा. ७६२), [25]एतेभ्यो धातुभ्यः स्ये सनि च [26]परतो वा परस्मैपदं भवति। वृत्–वर्त्स्यति। अवर्त्स्यत्। [27]विवृत्सति। वर्तिष्यते। अवर्तिष्यत। विवर्तिषते। [28]वृध्–वर्त्स्यति। अवर्त्स्यत्। विवृत्सति। वर्धिष्यते। अवर्धिष्यत। विवर्धिषते[29]। स्यसनोः इति किम्? वर्तते॥

---

1. विधीयते अ, भवति नास्ति फ. 2. वाक्यमिदं नास्ति ड. 3. एव इत्यधिकम् अ. 4. तत्र नास्ति अ. 5. तेभ्यः अ. 6. उदाहरणमिदं नास्ति फ. 7. कर्तव्यम् इत्यधिकम् फ. 8. तस्येदं ग्रहणं, क्यषन्ताद् धातोः ह. 9. विभाषा फ. 10. भवति नास्ति फ. 11. शेषादिति नित्ये प्रा ते विकल्पार्थं वचनम् इत्यधिकम् अ.क. 12. आत्मनेपदेन ह. 13. इत्यादिना क.फ.ह. 14. विधीयते नास्ति फ. 15. तच्चात्र फ. 16. अत्र ड, अभिसम्बध्यते क.फ. 17. इत्यनुवर्तते अ.क, इति अनुगम्यते फ. 18. नित्ये आत्मनेपदे प्राप्ते इत्यधिकम् अ.क.फ, द्युतादयः ब, लुडादयः ह. 19. अन्तर्भवति ह, गम्यते फ. 20. वचनमिदमारभ्यते इत्यधिकम् अ. 21. च फ. 22. अलृटत् अलोटिष्ट ब.ड, अत्यलुठत् क. 23. विद्योतते क.फ. 24. वा इत्येव इत्यधिकम् ड. 25. इति इत्यधिकम् अ.ह. 26. परतो नास्ति अ.ड.फ.ह. 27. विवृत्स्यति फ. 28. वृधु ड. 29. एवं शृधादिषु द्रष्टव्यम्, शृध्--शर्त्स्यति। अशर्त्स्यत्। शिशृत्सति। शर्धिष्यते। अशर्धिष्यत। शिशर्धिषते। स्यन्द्-- स्यिन्त्स्यति। अस्यन्त्स्यत्। सिस्यन्त्सति। स्यन्दिष्यते। अस्यन्दिष्यत। सिस्यन्दिषते। कृप्--कल्प्स्यति। अकल्प्स्यत्। चक्लृप्सति। कल्पिष्यते। अकल्पिष्यत। चिकल्पिषते। वृद्भ्यश्चतुर्भ्य इति परस्मैपदेषु इट्प्रतिषेधः इत्यधिकम्. अ.